# 2022

## M.A.

## 2nd Semester Examination

## SANSKRIT

## PAPER—SAN-203

## POETRY-I

*Full Marks* : 40

*Time* : 2 Hours

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

सर्वे प्रश्नाः संस्कृतेनैव समाधेयाः। (देवनागर्या)

### Group–A

1. यथेच्छं प्रश्नद्वयं समाधेयम् – 2×2

(a) 'नैषधचरितम्' – इति महाकाव्यस्य उत्सः कः ? प्रधानश्च रसः कः?

(b) नैषधचरिते प्रथमसर्गे प्रधानं छन्दः किमस्ति? अन्तिमश्लोकश्च केन छन्दसा विरचितः?

(c) नलस्य राज्ये अतिवृष्टिः आश्रयमप्राप्य कुत्र आश्रयं नीता?

**2.** यथेच्छं द्वयोः व्याख्या कार्या — 2×4

(a) रसैः कथा यस्य सुधावधीरिणी

नलः स भूजानिरभूद्गुणाद्भुतः।

सुवर्ण-दण्डैक-सितातपत्रित-

ज्वलत्प्रतापावलि-कीर्त्तिमण्डलः॥

(b) विभज्य मेरुर्न यदर्थिसात् कृतो

न सिन्धुरुत्सर्गजलव्ययैर्मरुः।

अमानि तत्तेन निजायशोयुगं

द्विफालबद्धाश्चिकुराः शिरःस्थितम्॥

(c) यथोह्यमानः खलु भोगभोजिना

प्रसह्य वैरोचनिजस्य पत्तनम्।

विदर्भजाया मदनस्तथा मनो

नलावरुद्धं वयसैव वेशितः॥

**3.** एक प्रश्नः समाधेयः — 1×8

(a) राज्ञः नलस्य चरित्रं नैषधचरितस्य प्रथमसर्गमनुसृत्य आलोच्यताम्।

(b) नैषधचरितस्य प्रथमसर्गमनुसृत्य हंसस्य विलापो विशदं वर्ण्यताम्।

## Group–B

**4.** यथेच्छं प्रश्नद्वयं समाधेयम् — 2×2

(a) मङ्गलाचरणं कतिविधम्? कानि च तानि? मेघदूते कविना कीदृशं मङ्गलाचरणं कृतम्?

(b) 'रामगिर्याश्रमेषु' इति पदे बहुवचनस्य प्रयोगः कथं संगच्छते?

(c) 'मेघदूतम्' इति खण्डकाव्ये कैलासपर्यन्तं मेघस्य सहयात्रिणः के सन्ति?

**5.** यथेच्छं द्वयोः व्याख्या कार्या — 2×4

(a) धूमज्योतिःसलिलमरुतां सन्निपातः क्व मेघः
सन्देशार्थाः क्व पटुकरणैः प्रणिभिः प्रापणीयाः।
इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे
कामार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु॥

(b) वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तराशां
सौधोत्सङ्गप्रणयविमुखो मा स्म भूरुज्जयिन्याः।
विद्युद्दामस्फुरणचकितैस्तत्र पौराङ्गनानां
लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽसि॥

(c) आनन्दोत्थं नयनसलिलं यत्र नान्यैर्निमित्तै-
र्नान्यस्तापः कुसुमशरजादिष्टसंयोगसाध्यात्।
नाप्यन्यस्मात् प्रणकलहाद्विप्रयोगोपपत्ति-
र्वित्तेशानां न च खलु वयो यौवनादन्यदस्ति॥

**6.** एक प्रश्नः समाधेयः — 1×8

(a) 'मार्गं तावच्छृणु' — केन कं प्रति उक्तिरेषा कृता? मेघदूतदिशा तत्रोक्तस्य मार्गस्य विवरणं प्रस्तूयताम्।

(b) 'यत्रोन्मत्तभ्रमरमुखराः पादपा नित्यपुष्पाः' — इत्यनेन सम्बन्धः नगरविशेषः कः ? मेघदूतमनुसृत्य तस्याः नगर्याः सौन्दर्यम् उपवर्ण्यताम्।

---